श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## UG-11.28 - ષષ્ઠ સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.**
**દેવીં(મ્) સરસ્વતીં(વઁ) વ્યાસં(ન્), તતો જયમુદીરયેત્.**

**નામસઙ્કીર્તનં(યઁ) યસ્ય, સર્વપાપપ્રણાશનમ્.**
**પ્રણામો દુઃખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**શ્રીમદ્ભાગવતમહાપુરાણમ્**

**એકાદશઃ સ્કન્ધઃ**

**.. અથઅષ્ટાવિં(મ્)શોઽધ્યાયઃ ..**

**શ્રીભગવાનુવાચ**

**પરસ્વભાવકર્માણિ, ન પ્રશં(મ્)સેન્ન ગર્હયેત્ .**
**વિશ્વમેકાત્મકં(મ્) પશ્યન્, પ્રકૃત્યા પુરુષેણ ચ .. ૧..**

**પરસ્વભાવકર્માણિ, યઃ(ફ્) પ્રશં(મ્)સતિ નિન્દતિ .**
**સ આશુ ભ્રશ્યતે સ્વાર્થા-દસત્યભિનિવેશતઃ .. ૨..**

**તૈજસે નિદ્રયાઽઽપન્ને, પિણ્ડસ્થો નષ્ટચેતનઃ .**
**માયાં(મ્) પ્રાપ્નોતિ મૃત્યું(વઁ) વા, તદ્વન્નાનાર્થદૃક્ પુમાન્ .. ૩..**

કિં(મ્) ભદ્રં(ઙ્) કિમભદ્રં(વઁ) વા, દ્વૈતસ્યાવસ્તુનઃ(ખ્) કિયત્ .
વાચોદિતં(ન્) તદનૃતં(મ્), મનસા ધ્યાતમેવ ચ .. ૪..

છાયાપ્રત્યાહ્વયાભાસા, હ્યસન્તોઽપ્યર્થકારિણઃ .
એવં(ન્) દેહાદયો ભાવા, યચ્છન્ત્યામૃત્યુતો ભયમ્ .. ૫..

આત્મૈવ તદિદં(વઁ) વિશ્વં(મ્), સૃજ્યતે સૃજતિ પ્રભુઃ .
ત્રાયતે ત્રાતિ વિશ્વાત્મા, હ્રિયતે હરતીશ્વરઃ .. ૬..

તસ્માન્ન હ્યાત્મનોઽન્યસ્મા-દન્યો ભાવો નિરૂપિતઃ .
નિરૂપિતેયં(ન્) ત્રિવિધા, નિર્મૂલા ભાતિરાત્મનિ .
ઇદં(ઙ્) ગુણમયં(વઁ) વિદ્ધિ, ત્રિવિધં(મ્) માયયા કૃતમ્ .. ૭..

એતદ્ વિદ્વાન્ મદુદિતં(ઞ્), જ્ઞાનવિજ્ઞાનનૈપુણમ્ .
ન નિન્દતિ ન ચ સ્તૌતિ, લોકે ચરતિ સૂર્યવત્ .. ૮..

પ્રત્યક્ષેણાનુમાનેન, નિગમેનાત્મસં(વઁ)વિદા .
આદ્યન્તવદસજ્જ્ઞાત્વા, નિઃ(સ્)સં(ઙ્)ગો વિચરેદિહ .. ૯..

ઉદ્ધવ ઉવાચ

નૈવાત્મનો ન દેહસ્ય, સં(મ્)સૃતિર્દ્રષ્ટૃદૃશ્યયોઃ .
અનાત્મસ્વદૃશોરીશ, કસ્ય સ્યાદુપલભ્યતે .. ૧૦..

આત્માવ્યયોઽગુણઃ(શ્) શુદ્ધઃ(સ્), સ્વયં(ઞ્)જ્યોતિરનાવૃતઃ .
અગ્નિવદ્દારુવદચિદ્-દેહઃ(ખ્) કસ્યેહ સં(મ્)સૃતિઃ .. ૧૧..

શ્રીભગવાનુવાચ

યાવદ્ દેહેન્દ્રિયપ્રાણૈ-રાત્મનઃ સન્નિકર્ષણમ્ .
સં(મ્)સારઃ(ફ્) ફલવાં(મ્)સ્તાવ-દપાર્થોઽપ્યવિવેકિનઃ .. ૧૨..

અર્થે હ્યવિદ્યમાનેઽપિ, સં(મ્)સૃતિર્ન નિવર્તતે .
ધ્યાયતો વિષયાનસ્ય, સ્વપ્નેઽનર્થાગમો યથા .. ૧૩..

યથા હ્યપ્રતિબુદ્ધસ્ય, પ્રસ્વાપો બહ્વનર્થભૃત્ .
સ એવ પ્રતિબુદ્ધસ્ય, ન વૈ મોહાય કલ્પતે .. ૧૪..

શોકહર્ષભયક્રોધ-લોભમોહસ્પૃહાદયઃ .
અહં(ઙ્)કારસ્ય દૃશ્યન્તે, જન્મ મૃત્યુશ્ચ નાત્મનઃ .. ૧૫..

દેહેન્દ્રિયપ્રાણમનોઽભિમાનો,
જીવોઽન્તરાત્મા ગુણકર્મમૂર્તિઃ .
સૂત્રં(મ્) મહાનિત્યુરુધેવ ગીતઃ(સ્)
સં(મ્)સાર આધાવતિ કાલતન્ત્રઃ .. ૧૬..

અમૂલમેતદ્ બહુરૂપરૂપિતં(મ્),
મનોવચઃ(ફ્)પ્રાણશરીરકર્મ .
જ્ઞાનાસિનોપાસનયા શિતેનચ્-
છિત્ત્વા મુનિર્ગાં(વ્ઁ) વિચરત્યતૃષ્ણઃ .. ૧૭..

જ્ઞાનં(વ્ઁ) વિવેકો નિગમસ્તપશ્ચ,
પ્રત્યક્ષમૈતિહ્યમથાનુમાનમ્ .
આદ્યન્તયોરસ્ય યદેવ કેવલં(ઙ્),
કાલશ્ચ હેતુશ્ચ તદેવ મધ્યે .. ૧૮..

યથા હિરણ્યં(મ્) સ્વકૃતં(મ્) પુરસ્તાત્,
પશ્ચાચ્ચ સર્વસ્ય હિરણ્મયસ્ય .
તદેવ મધ્યે વ્યવહાર્યમાણં(ન્),
નાનાપદેશૈરહમસ્ય તદ્વત્ .. ૧૯..

વિજ્ઞાનમેતત્ત્રિયવસ્થમં(ઙ્)ગ,
ગુણત્રયં(ઙ્) કારણકાર્યકર્તૃ .
સમન્વયેન વ્યતિરેકતશ્ચ,
યેનૈવ તુર્યેણ તદેવ સત્યમ્ .. ૨૦..

ન યત્ પુરસ્તાદુત યન્ન પશ્ચાન્-
મધ્યે ચ તન્ન વ્યપદેશમાત્રમ્ .
ભૂતં(મ્) પ્રસિદ્ધં(ઞ્) ચ પરેણ યદ્ યત્,
તદેવ તત્ સ્યાદિતિ મે મનીષા .. ૨૧..

અવિદ્યમાનોઽપ્યવભાસતે યો,
વૈકારિકો રાજસસર્ગ એષઃ .
બ્રહ્મ સ્વયં(ઞ્)જ્યોતિરતો વિભાતિ,
બ્રહ્મેન્દ્રિયાર્થાત્મવિકારચિત્રમ્ .. ૨૨..

એવં(મ્) સ્ફુટં(મ્) બ્રહ્મવિવેકહેતુભિઃ(ફ્)

પરાપવાદેન વિશારદેન .

છિત્ત્વાઽઽત્મસન્દેહમુપારમેત,

સ્વાનન્દતુષ્ટોઽખિલકામુકેભ્યઃ .. ૨૩..

નાત્મા વપુઃ(ફ્) પાર્થિવમિન્દ્રિયાણિ,

દેવા હ્યસુર્વાયુર્જલં(મ્) હુતાશઃ .

મનોઽન્નમાત્રં(ન્) ધિષણા ચ સત્ત્વ-

મહં(ઙ્)કૃતિઃ(ખ્) ખં(ઙ્) ક્ષિતિરર્થસામ્યમ્ .. ૨૪..

સમાહિતૈઃ(ખ્) કઃ(ખ્) કરણૈર્ગુણાત્મભિર્-

ગુણો ભવેન્મત્સુવિવિક્તધામ્નઃ .

વિક્ષિપ્યમાણૈરુત કિં(ન્) નુ દૂષણં(ઙ્),

ઘનૈરુપેતૈર્વિગતૈ રવેઃ(ખ્) કિમ્ .. ૨૫..

યથા નભો વાય્વનલામ્બુભૂગુણૈર્-

ગતાગતૈર્વર્તુગુણૈર્ન સજ્જતે .

તથાક્ષરં(મ્) સત્ત્વરજસ્તમોમલૈ-

રહં(મ્)મતેઃ(સ્) સં(મ્)સૃતિહેતુભિઃ(ફ્) પરમ્ .. ૨૬..

તથાપિ સં(ઙ્)ગઃ(ફ્) પરિવર્જનીયો,

ગુણેષુ માયારચિતેષુ તાવત્ .

મદ્ભક્તિયોગેન દૃઢેન યાવદ્-

રજો નિરસ્યેત મનઃ(ખ્) કષાયઃ .. ૨૭..

યથાઽઽમયોઽસાધુચિકિત્સિતો નૃણાં(મ્),
પુનઃ(ફ્) પુનઃ(સ્) સં(ન્)તુદતિ પ્રરોહન્ .
એવં(મ્) મનોઽપક્વકષાયકર્મ
કુયોગિનં(વ્ઁ) વિધ્યતિ સર્વસં(ઙ્)ગમ્.. ૨૮..

કુયોગિનો યે વિહિતાન્તરાયૈર્-
મનુષ્યભૂતૈસ્ત્રિદશોપસૃષ્ટૈઃ .
તે પ્રાક્તનાભ્યાસબલેન ભૂયો,
યુઞ્જન્તિ યોગં(ન્) ન તુ કર્મતન્ત્રમ્ .. ૨૯..

કરોતિ કર્મ ક્રિયતે ચ જન્તુઃ(ખ્),
કેનાપ્યસૌ ચોદિત આનિપાતાત્ .
ન તત્ર વિદ્વાન્ પ્રકૃતૌ સ્થિતોઽપિ
નિવૃત્તતૃષ્ણઃ(સ્) સ્વસુખાનુભૂત્યા .. ૩૦..

તિષ્ઠન્તમાસીનમુત વ્રજન્તં(મ્),
શયાનમુક્ષન્તમદન્તમન્નમ્ .
સ્વભાવમન્યત્ કિમપીહમાન-
માત્માનમાત્મસ્થમતિર્ન વેદ .. ૩૧..

યદિ સ્મ પશ્યત્યસદિન્દ્રિયાર્થં(ન્)
નાનાનુમાનેન વિરુદ્ધમન્યત્ .
ન મન્યતે વસ્તુતયા મનીષી
સ્વાપ્નં(યઁ) યથોત્થાય તિરોદધાનમ્ .. ૩૨..

પૂર્વં(ઙ્) ગૃહીતં(ઙ્) ગુણકર્મચિત્ર-

મજ્ઞાનમાત્મન્યવિવિક્તમં(ઙ્) ગ .

નિવર્તતે તત્ પુનરીક્ષયૈવ

ન ગૃહ્યતે નાપિ વિસૃજ્ય આત્મા .. ૩૩..

યથા હિ ભાનોરુદયો નૃચક્ષુષાં(ન્),

તમો નિહન્યાન્ન તુ સદ્ વિધત્તે .

એવં(મ્) સમીક્ષા નિપુણા સતી મે,

હન્યાત્તમિસ્રં(મ્) પુરુષસ્ય બુદ્ધેઃ .. ૩૪..

એષ સ્વયં(ગ્)જ્યોતિરજોઽપ્રમેયો,

મહાનુભૂતિઃ(સ્) સકલાનુભૂતિઃ .

એકોઽદ્વિતીયો વચસાં(વ઼્) વિરામે,

યેનેષિતા વાગસવશ્ચરન્તિ .. ૩૫..

એતાવાનાત્મસમ્મોહો, યદ્ વિકલ્પસ્તુ કેવલે .

આત્મન્નૃતે સ્વમાત્માન-મવલમ્બો ન યસ્ય હિ .. ૩૬..

યન્નામાકૃતિભિર્ગ્રાહ્યં(મ્), પં(ગ્)ચવર્ણમબાધિતમ્ .

વ્યર્થેનાપ્યર્થવાદોઽયં(ન્) દ્વયં(મ્) પણ્ડિતમાનિનામ્ .. ૩૭..

યોગિનોઽપક્વયોગસ્ય, યું(ગ્)જતઃ(ખ્) કાય ઉત્થિતૈઃ .

ઉપસર્ગૈર્વિહન્યેત, તત્રાયં(વ઼્) વિહિતો વિધિઃ .. ૩૮..

યોગધારણયા  કાં(મ્), શ્ચિદાસનૈર્ધારણાન્વિતૈઃ .
તપોમન્ત્રૌષધૈઃ(ખ્) કાં(મ્), શ્ચિદુપસર્ગાન્ વિનિર્દહેત્ .. ૩૯..

કાં(મ્)શ્ચિન્મમાનુધ્યાનેન, નામસં(ઙ્)કીર્તનાદિભિઃ .
યોગેશ્વરાનુવૃત્ત્યા વા, હન્યાદશુભદાગ્ છનૈઃ .. ૪૦..

કેચિદ્ દેહમિમં(ન્) ધીરાઃ(સ્) સુકલ્પં(વ઼્ઁ) વયસિ સ્થિરમ્ .
વિધાય વિવિધોપાયૈ-રથ યું(ઞ્)જન્તિ સિદ્ધયે .. ૪૧..

ન હિ તત્કુશલાદૃત્યં(ન્), તદાયાસો હ્યપાર્થકઃ .
અન્તવત્ત્વાચ્છરીરસ્ય, ફલસ્યેવ વનસ્પતેઃ .. ૪૨..

યોગં(ન્) નિષેવતો નિત્યં(ઙ્), કાયશ્ચેત્કલ્પતામિયાત્ .
તચ્છ્રદ્દધ્યાન્ન મતિમાન્, યોગમુત્સૃજ્ય મત્પરઃ .. ૪૩..

યોગચર્યામિમાં(યૢઁ) યોગી, વિચરન્ મદપાશ્રયઃ .
નાન્તરાયૈર્વિહન્યેત, નિઃ(સ્)સ્પૃહઃ(સ્) સ્વસુખાનુભૂઃ .. ૪૪..

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(મ્)સ્યાં(મ્)
સં(મ્)હિતાયામેકાદશસ્કન્ધેડષ્ટાવિં(મ્)શોડધ્યાયઃ .. ૨૮..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ